International Journal of Sanskrit Research 2023; 9(3): 109-112

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2023; 9(3): 109-112
© 2023 IJSR
www.anantaajournal.com
Received: 15-03-2023
Accepted: 18-04-2023

**मानस कुमार बेहेरा**
शोधछात्र अद्वैतवेदान्त विभाग, श्री लाल बादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नवदेहली, भारत

**Corresponding Author:**
**मानस कुमार बेहेरा**
शोधछात्र अद्वैतवेदान्त विभाग, श्री लाल बादुर शास्त्री राष्ट्रिय संस्कृत विश्वविद्यालय, नवदेहली, भारत

# ब्रह्मसूत्रे ज्ञानकर्मणोः स्वरूपस्य विचारः

**मानस कुमार बेहेरा**

**प्रस्तावना**

ब्रह्मसूत्रस्य द्वितीयाध्याये तृतीयपादे द्वादशाधिकरणे ज्ञानस्य तथा चतुर्दशाधिकरणे कर्मणः विचारः दृश्यते। सूत्रम् –

‘‘ज्ञोऽत एव –
इत्यत्र जीवः स्वयं ज्योतिस्वरूपः।’’ [1]

अत एव अस्य उत्पत्तिर्नास्ति। जीवात्मनः उत्पत्तेः प्रलयस्य च प्रतिषेधं कृत्वा इदानीमस्य स्वप्रकाशरूपसिद्ध्यर्थं पूर्वपक्षस्य अवतारणा कृता शास्त्रकारेण। “आत्मैवास्य ज्योतिः ’’ [2] इति श्रुत्या आत्मनः स्वप्रकाशत्वं सिद्धम्। एवं च “पश्यश्चक्षु शृण्वन् श्रोत्रम्। [3] इति श्रुत्या अनित्यज्ञानस्य प्रतिपादनं भवति। अत्र उभयथा श्रुतिविरोधत्वात् संशयो भवति यत् - यदि जीवः ब्रह्मस्वरूपः तर्हि तस्मिन् जीवे नित्यज्ञानस्वरूपसिद्धौ सति जीवस्य इन्द्रियादिसाधनं व्यर्थं स्यात्। सुषुप्तिदशायां ज्ञानस्य अभावः प्रतीयते। अतः आत्मनः तथा मनसः उभयोः संयोगेन जीवात्मनि ज्ञानोत्पत्ति जायते। अयमाशयः भवति पूर्वपक्षस्य।

आत्मा नित्यचैतन्यस्वरूपः। तथा असंगो भवति। अतः अस्य आत्मनः विषयेण साकं स्वतः सम्बन्धः नास्ति। उपाधिः जीवभावेन अवस्थितं वर्त्तते। कारणं यत् ‘‘विज्ञानमानन्दं ब्रह्म’’ [4] इत्यत्य ब्रह्म भवति विज्ञानमयम् आनन्दमयं च। ‘‘सत्यं ज्ञानमनन्तं ब्रह्म [5] ‘‘अनन्तो’’ इत्यत्र अन्तः रहितम्, बाह्यरहितम् ज्ञानस्वरूपं कृत्स्नं विज्ञानैकरसं भवति ब्रह्म। इत्यादिभिः श्रुतिवाक्यैः परंब्रह्मणः चैतन्यस्वरूपत्वम् उद्घोषितम्। ब्रह्म "ज्ञ" स्वरूपम्, न कर्मणा तत् साध्यं, इन्द्रियगोचरं प्रत्यक्षसिद्धं चित्स्वरूपं भवति। अतः यद्यपि ब्रह्म ज्ञानस्वरूपं भवति अत्र न कर्मणा साकं तस्य ज्ञानस्य सम्बन्धो वर्तते।

जीवस्य कर्मण्यधिकारः वर्त्तते। तद्गुणसारत्वाधिकरणैवापरोऽपि जीवधर्म प्रपंच्यते। कर्ता चायं जीवः स्यात्। कस्मात् शास्त्रार्थवत्त्वात्। एवं यजेत, जुहुयात्, दद्यात् इत्येवंविध विधिशास्त्रमर्थवद् भवति। ज्ञानस्वरूपं यत् ब्रह्म तत् न विधिसाध्यम्। जीवस्य कर्तृत्वम् यद्यस्य लौकिकेषु च क्रियासु कर्तृत्वं व्यपदिशति शास्त्रम् अविज्ञानं विज्ञानं यज्ञं तनुते कर्मणि तनुतेऽपि च। अन्यथा कर्त्तुं वा जीवपक्षे संभवति, परन्तु ब्रह्मज्ञानं स्वतन्त्रम्। ब्रह्म न कर्त्ता न भोक्ता भवति। अत एव ज्ञानकर्मणोः समुच्चयः सर्वथा असम्भवः।

तत्र तृतीयाध्यायस्य द्वितीयपादस्य कर्मानुसृत्यधिकरणे कर्मविषयः प्रतिपादितः। नाप्यत्र कर्मणा साकं ज्ञानस्य समुच्चयो संभवति। ब्रह्मणः जीवस्य उत्थानं यद्यपि श्रूयते तदर्थं श्रुतिवाक्यं दीयते। ब्रह्म भवति जीवस्य सुषुप्तिस्थानम्। इत्थं च प्रतिपादिनम्। तदेव न समीचीनम्। कारणं सुषुप्तिस्थानात् अन्यस्यापि उत्थानं संभवति। अतः सुषुप्तिस्थानपदेन नाड्यादीनां ग्रहणं जायते। इत्थं पूर्वपक्षस्य आशङ्का जायते। अस्याः आशंकायाः समाधानं शास्त्रकारेण कृतं यत् - स एव तु जीवः सुप्तः स्वास्थ्यसंगतः पुनरुतिष्ठति नान्यः कस्मात्। कर्मानुस्मृति- शब्दविधिभ्यः, यतः कर्मावशेषं वर्त्तते ततः तस्य उत्थानं संभवति। नान्यथा उत्थानं संभवति। अत्र उत्थानक्रमः जीवस्य भवति न ज्ञानस्य। जीवस्य शयने ज्ञानं वर्त्तते। उत्थितस्य जीवस्याऽपि ज्ञानं वर्त्तते। जीवो भवति कर्त्ता। अकर्त्ता भवति ज्ञानम्। गमनं, शयनं, ग्रहणं, धारणमित्यादिकं सर्वं जीवस्य कृते संभवति, ज्ञानकृते न । ज्ञानबलेन यद्यपि सर्वं कर्म क्रियते तथापि ज्ञानस्य स्वातन्त्र्यं सर्वथोपलब्धम्। अत्र ज्ञानपदेन ब्रह्मज्ञानं बोधयति। एकं श्रुतिवाक्यं दीयते यत् "इमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न वदन्ति" दर्गासप्तशत्यां वर्त्तते यत् - "ज्ञानमस्ति समस्तस्य जन्तो विषयगोचरे। विषयश्च महाभागाः याति चैवं पृथक् पृथक्। इति अत्राऽपि सर्वेषु जन्तुषु ज्ञानमेकमेव भवति। परन्तु विषयाणां भेदः बहुशः प्रतिपादितः। अस्मात् ज्ञायते यत् ज्ञानस्य एकत्वं सर्वथा समर्थितम्। विषयस्य अनैकत्वं च प्रतिपादितम्। तदेवं ज्ञानं मानवः बहुषु क्षेत्रेषु प्रयोगं करोति। बहुनां द्रव्याणां विचारः ज्ञानमाध्यमेन भवति तत् तत् विषयमाध्यमेन यद्यपि इदं घटज्ञानम्, इदं पटज्ञानमित्यादिरूपेण बहुधा प्रवर्त्तते तथापि तदेव ज्ञानं एकमेव। अत एव ज्ञानकर्मणो समुच्चयः सर्वथा संभवः।

अद्वैतवेदान्तेऽपि श्रुतिप्रमाणं दीयते यथा - ‘‘एकोऽहं बहुस्यां प्रजायेथ’’ [6] अर्थात् सर्वेषु प्राणिवर्गेषु आत्मनः स्थितिर्दृश्यते। अनन्तप्राणीवर्गेषु विद्यमानं तद् ब्रह्म एकमेव, नाप्यनन्तब्रह्मणः ग्रहणं वर्त्तते। प्राणीनां यथा कर्म वर्त्तते न तथा ब्रह्मणः।

पद्मपत्रे यथा जलस्य अवस्थितिर्जायते, तथा शरीरेषु आत्मनः। अतः कर्मज्ञानसमुच्चयः न तत्रापि समर्थितः शास्त्रकारेण। कर्मावबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः। इदमत्राकूतम् - ब्रह्मोपासनया भावनापराभिधानया कर्माण्यपेक्ष्यन्त इत्युक्तं, तत्र ब्रूमः - क्व पुनरस्याः कर्मापेक्षा ? किं कार्य्ये, यथाऽऽग्नेयादीनां परमापूर्वे चरमभाविफलानुकूले जनयितव्ये समिदाद्यपेक्षा ? स्वरूपे वा, यथा तेषामेव द्विरवत्तपुरोडाशादिद्रव्याग्निदेवताद्यपेक्षा ? न तावत् कार्य्ये, तस्य विकल्पासहत्वात्। तथा हि - ब्रह्मापासनाया ब्रह्मस्वरूपसाक्षात्कारः कार्य्यमभ्युपेयः, स चोत्पाद्यो वा स्यात्, यथा संयवनस्य पिण्डः। विकार्य्यो वा, यथाऽवघातस्य व्रीहयः। संस्कार्य्यो वा, यथा प्रोक्षणस्योलूखलादयः। प्राप्यो वा, यथा दोहनस्य पयः। न तावदुत्पाद्यः, न खलु घटादिसाक्षात्कार इव जड़स्वभावेभ्यो घटादिभ्यो भिन्न इन्द्रियाद्याधेयो ब्रह्मसाक्षात्कारो भावनाधेयः सम्भवति ब्रह्मणोऽपराधीनप्रकाशतया तत्साक्षात्कारस्य तत्स्वाभाव्येन नित्यतयोत्पाद्यत्वानुपपत्तेः। ततो भिन्नस्य वा भावनाधेयस्य साक्षात्कारस्य प्रतिभासप्रत्ययवत्संशयाक्रान्ततया प्रामाण्यायोगात्। तद्विषयस्य तत्सामग्रीकस्यैव बहुलं व्यभिचारोपलब्धेः। न खल्वनुमानविबुद्धं वन्हिं भावयतः शीतातुरस्य शिशिर भरमन्थरतरकायकाण्डस्य स्फुरज्ज्वालाजटिलानलसाक्षात्कारः प्रमाणन्तरेण संवाद्यते, विसंवादस्य बहुलमुपलम्भात्। तस्मात् प्रामाणिकसाक्षात्कारलक्षणकार्य्याभावान्नोपासनाया उत्पाद्ये कर्मापेक्षा। न च कूटस्थनित्यस्य सर्वव्यापिनो ब्रह्मण उपासनातो विकारसंस्कारप्राप्तयः सम्भवन्ति। स्यादेतत् - मा भूद् ब्रह्मसाक्षात्कार उत्पाद्यादिरूप उपासनायाः, संस्कार्य्यस्त्वनिर्वचनीयानाद्यविद्याद्वयापिधानापनयनेन भविष्यति, प्रतिसीरापिहिता नर्तकीव प्रतिसीरापनयद्वारा रङ्गव्यापृतेन। तत्र च कर्मणामुपयोगः। एतावांस्तु विशेषः - प्रतिसीरापनये पारिषदानां नर्त्तकीविषयसाक्षात्कारो भवति। इह तु अविद्यापिधानापनयमात्रमेव नापरमुत्पाद्यमस्ति। ब्रह्मसाक्षात्कारस्य ब्रह्मस्वभावस्य नित्यत्वेनानुत्पाद्यत्वात्।

अत्रोच्यते - का पुनरियं ब्रह्मोपासना ? किं शाब्दज्ञानमात्रसन्ततिराहो निर्विचिकित्सशाब्द- ज्ञानसन्ततिः ? यदि शाब्दज्ञानमात्रसन्ततिः, किमियमभ्यस्यमानाप्यविद्यां समुच्छेत्तुमर्हति ? तत्त्वविनिश्चयस्तदभ्यासो वा सवासनं विपर्य्यासमुन्मूलयेत् न संशयाभ्यासः, सामान्यमात्रदर्शनाभ्यासो वा। नहि स्थाणुर्वा पुरुषो वेति वाऽऽरोहपरिणाहवद्द्रव्यमिति वा शतशोऽपि ज्ञानमभ्यस्यमानं पुरुषः एवेति निश्चयाय पर्य्याप्तमृते विशेषदर्शनात्। ननुक्तं श्रुतमयेन ज्ञानेन जीवात्मनः परमात्मभावं गृहीत्वा युक्तिमयेन च व्यवस्थाप्यत इति। तस्मान्निर्विचित्सशाब्दज्ञानसन्ततिरूपोपासना कर्मसहकारिण्यविद्याद्वयोच्छेदहेतुः। न चासावनुत्पादितब्रह्मानुभवा तदुच्छेदाय पर्य्याप्ता। साक्षात्काररूपो हि विपर्य्यासः साक्षातकारूपेणैव तत्त्वज्ञानेनाच्छिद्यते, न तु परोक्षावभासेन। दिङ्मोहालातचक्रचलद्वृक्षमरू-मरीचिसलिलादिविभ्रमेष्वपरोक्षावभासिषु अपरोक्षावभासिभिरेव दिगादितत्त्वप्रत्ययैर्निवृत्तिदर्शनात्। नो खल्वाप्तवचन लिङ्गादिनिश्चितदिगादितत्त्वानां दिङ्मोहादयो निवर्त्तन्ते। तस्मात् त्वम्पदार्थस्य तत्पदार्थत्वेन साक्षात्कार एषितव्यः। एतावता हि त्वंपदार्थस्य दुःखिशोकित्वादिसाक्षात्कार- निवृत्तिर्नान्यथा।

न चैष साक्षात्कारो मीमांसासहितस्यापि शब्दस्य प्रमाणस्य फलम् अपि तु प्रत्यक्षस्य, तस्यैव तत्फलत्वनियमात्। अन्यथा कुटजवीजादपि बटाङ्कुरोत्पत्तिप्रसङ्गात्। तस्मान्निर्विचिकित्सश्राक्यार्थभावनापरिपाकसहितमन्तः करणं त्वपदार्थस्यापरोक्षस्य तत्तदुपाध्याकारनिषेधेन तत्पदार्थतामनुभावयतीति युक्तम्। न चायमनुभवो ब्रह्मस्वभावो येन न जन्येत, अपि त्वन्तःकरणस्यैव वृत्तिभेदो ब्रह्मविषयः। न चैतावता ब्रह्मणो नापराधीनप्रकाशता। नहि शाब्दज्ञानप्रकाश्यं ब्रह्म स्वयंप्रकाशं न भवति। सर्वोपाधिरहितं हि स्वयंज्योतिरिति गीयते, न तूपहितमपि। यथाह स्म भगवान भाष्यकारः, नायमेकान्तेनाविषयः इति। न चान्त:करणवृत्तावप्यस्य साक्षात्कारे सर्वोपाधिविनिर्मोकः। तस्यैव तदुपाधोर्विनश्यदवस्थस्य स्वपरोपाधिविरोधिनो विद्यमानत्वात्। अन्यथा चैतन्यच्छायापत्तिं विनाऽन्तःकरणवृत्तेः स्वयमचेतनायाः स्वप्रकाशत्वानुपपत्तौ साक्षात्कारत्वायोगात्। न चानुमितभावितवन्हिसाक्षात्कार-वत्प्रतिभासत्वेनास्याप्रामाण्यं, तत्र वन्हिस्वलक्षणस्य परोक्षत्वात्, इह तु ब्रह्मरूपस्योपाधिकलुषितस्य जीवस्य प्रागप्यपरोक्षत्वात्। न हि शुद्धबुद्धत्वादयो वस्तुतस्ततोऽतिरिच्यन्ते। जीव एव तु तत्तदुपाधिरहितः शुद्धबुद्धादिस्वभावो ब्रह्मेति गीयते। न च तत्तदुपाधिविरहोऽपि ततोऽतिरिच्यते। तस्माद्यथा गान्धर्वशास्त्रार्थज्ञानाभ्यासाहितसंस्कारसचिव श्रोत्रेन्द्रियेण षड्जादिस्वरग्राम-मूर्च्छनाभेदमध्यक्षमनुभवति, एवं वेदान्तार्थज्ञानाभ्यासाहितसंस्कारो जीवस्य ब्रह्मभावमन्तः करणेनेति।

अन्तःकरणवृत्ती ब्रह्मसाक्षात्कारे जनयितव्येऽस्ति तदुपासनायाः कर्मापेक्षेति चेत्, न, तस्याः कर्मानुष्ठानेन सहभावाभावेन तत्सहकारित्वानुपपत्तेः। न खलु तत्त्वमसीत्यादेर्वाक्यान्निर्विचिकित्सं शुद्धबुद्धादासीनस्वभावमकर्तृत्वाद्युपेतम पेतब्राह्मणत्वादिजातिं देहाद्यतिरिक्तमेकमात्मानं प्रतिपद्यमानः कर्मस्वधिकारमवबोद्धुमर्हति। अनहंश्च कथं कर्त्ता वाऽधिकृतो वा ? यद्युच्येत निश्चितेऽपि तत्त्वे विपर्य्यासनिबन्धनो व्यवहारोऽनुवर्त्तमानो दृश्यते, यथा गुडस्य माधुर्य्यविनिश्रयेऽपि पितोपहत्तोन्द्रियाणां तिक्तावभासानुवृत्तिः, आस्वाद्य थूत्कृत्य त्यागात्। तस्मादविद्यासंस्कारानुवृत्त्या कर्मानुष्ठानं, तेन च विद्यासहकारिणा तत्समुच्छेद उपपत्स्यते। न च कर्माविद्यात्मकं कथमविद्यामुच्छिनत्ति, कर्मणो वा तदुच्छेदकस्य कुत उच्छेद इति वाच्यम्, सजातीयस्वपरविरोधिनां भावनां बहुलमुपलब्धेः। यथा पयः पयोऽन्तरं जरयति, स्वयं च जीर्य्यति। यथा विषं विषान्तरं शमयति, स्वयं च शाम्यति। यथा वा कतकरजो रजोऽन्तराविले पाथसि प्रक्षिप्तं रजोऽन्तराणि भिन्दत् स्वयमाप भिद्यमानमनाविलं पाथः करोति। एवं कर्माविद्यात्मकमपि अविद्यान्तराणि अपगमयत् स्वयमप्यपगच्छतीति।

अत्रोच्यते- सत्यं सदेव सोम्येदमित्युपक्रमात्तत्वमसीत्यन्तात् शब्दाद् ब्रह्ममीमांसोपकरणादसकृतभ्यस्ताद् निर्विचिकित्सेऽनाद्यविद्योपादानदेहाद्यतिरिक्त-प्रत्यगात्मतत्त्वावबोधे जातेऽपि अविद्यासंस्कारानुवृत्तावनुवर्तन्ते सांसारिकाः प्रत्ययास्तद्वयवहाराश्च, तथापि तानप्ययं व्यवहारप्रत्ययान् मिथ्येति मन्यमानो विद्वान्न श्रद्धत्ते पित्तोपहतेन्द्रिय इव गुडं थूत्कृत्य त्यजन्नपि तस्य तिक्तताम्। तथा चायं क्रियाकर्त्तृकरणेतिकर्त्तव्यताफलप्रपञ्चमतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम ? विदुषो ह्यधिकारोन्यथा पशुशूद्रादीनामप्यधिकारो दुर्वारः स्यात्। क्रियाकर्त्रादिस्वरूपविभागं च विद्वस्यमान इह विद्वानभिमतः कर्मकाण्डे। अतएव भगवानविद्वद्विषयत्वं शास्त्रस्य वर्णयाम्बभूव भाष्यकारः। तस्माद्यथा राजजातीयाभिमानकर्त्तृके राजसूये न विप्रवैश्यजातीयाभिमानिनोरधिकारः, एवं द्विजातिकर्त्तृक्रियाकरणादिविभागाभिमानिकर्त्तृके कर्मणि न तदनभिमानिनोऽधिकारः। न चानधिकृतेन समर्थेनापि कृतं वैदिकं कर्म फलाय कल्पते वैश्यस्तोम इव ब्राह्मणराजन्याभ्याम्। तेन दृष्टार्थेषु कर्मसु शक्तः प्रवर्त्तमानः प्राप्नोतु फलं दृष्टत्वात्। अदृष्टार्थेषु तु शास्त्रैकसमधिगम्यं फलमनधिकारिणि न युज्यत इति नोपासनायाः कार्य्यं कमपिक्षा। स्यादेतत्- मनुष्याभिमानवदधिकारिके कर्मणि विहिते यथा तदभिमानरहितस्यानधिकारः। एवं निषेधविधयोऽपि मनुष्याधिकारा इति तदभिमानरहितस्तेष्वपि नाधिक्रियते पश्वादिवत्। तथा चायं निषिद्धमनुतिष्ठन् न प्रत्यवेयात् तीर्य्यगादिविदित भिन्नकर्मतापातः, मैवम्, न खल्वयं सर्वथा मनुष्याभिमानरहितः, किं त्वविद्यासंस्कारानुवृत्त्याऽस्य मात्रया। अनुवर्त्तमानं च मिथ्येति मन्यमानो न श्रद्धत्त इत्युक्तम्। किमतो यद्येवम् ? तदभिमानोऽनुवर्त्तते एतदतो भवति - विधिषु श्राद्धोऽधिकारी नाश्राद्धः। ततश्च मनुष्याद्यभिमाने नश्रद्दधानो न विधिशास्त्रेणाधिक्रियते। तथा च स्मृतिरश्रद्धया हुतं दत्तमित्यादिका। निषेधशास्त्रं तु न श्रद्धामपेक्षते, अपि तु निषिध्यमानक्रियोन्मुखो नर इत्येव प्रवर्त्तते। तथा च सासांरिक इव श्रद्धावगतब्रह्मतत्त्वोऽपि निषेधमतिक्रम्य प्रवर्त्तमानः प्रत्यवैतीति न भिन्नकर्मदर्शनाभ्युपगमः। तस्मान्नोपासनायाः कार्य्ये कर्मापेक्षा। अत एव नोपासनोत्पत्तावपि निर्विचिकित्सशाब्दज्ञानोत्पत्त्युत्तरकालमनधिकारः कर्मणीत्युक्तम्। तथा च श्रुतिः - "न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः”।

तत्किमिदानीमनुपयोग एव सर्वथेह कर्मणाम् ? तथा च ‘‘विविदिषन्ति यज्ञेन’’ इत्याद्याः श्रुतयो विरूध्येरन्। न, आरादुपकारकत्वात् कर्मणां यज्ञादीनाम्। तथाहि - ‘‘तमेतमात्मानं वेदानुवचनेन’’ नित्यस्वाध्यायेन ‘‘ब्राह्मणा विविदिषन्ति’’ वेदितुमिच्छन्ति, न तु विदन्ति, वस्तुतः प्रधानस्यापि वेदनस्य प्रकृत्यर्थतया शब्दतो गुणत्वादिच्छायाश्च प्रत्ययार्थतया प्राधान्यात्। प्रधानेन च कार्य्यसम्प्रत्त्ययात्। नहि राजपुरुषमानयेत्युक्ते वस्तुतः प्रधानमपि राजा पुरुषविशेषणतया शब्दत उपसर्जनमानीयतेऽपि तु पुरुष एव, शब्दतस्तस्य प्राधान्यात्। एवं वेदानुवचनस्येव यज्ञस्यापीच्छासाधनतया विधानम्, एवं तपसोऽनाशकस्य, कामानशनमेव तपः, हितमितमेध्याशिनो हि ब्रह्मणि विविदिषा भवति, न तु सर्वथाऽनश्नतो, मरणात्। नापि

चान्द्रायणादितपः शीलस्य,। एतानि च नित्यान्युपात्तदुरितनिबर्हणेन पुरुपं संस्कुर्वन्ति। तथा च श्रुतिः- धातुवैषम्यापत्तेः - "स ह वा आत्मयाजी यो वेद इदं मेऽनेनाङ्गं संस्क्रियत इदं मेऽनेनाङ्गमुपचीयते'' इति। अनेनेति प्रकृतं यज्ञादि परामृशति। स्मृतिश्च ''यस्यैतेऽष्टाचत्वारिंशत्संस्काराः'' इति। नित्यनैमित्तिकानुष्ठानप्रक्षीणकल्मषस्य च विशुद्धसत्त्वस्याविदुष एव उत्पन्नविविदिषस्य ज्ञानोत्पत्तिं दर्शयत्याथर्वणी श्रुतिः - ''विशुद्धसत्त्वस्ततस्तु तं पश्यति निष्कलं ध्यायमानः'' इति। स्मृतिश्च - ''ज्ञानमुत्पद्यत पुसा क्षयात् पापस्य कर्मणः'' इत्यादिका।

क्लृप्तेनैव च नित्यानां कर्मणां नित्ये हि तेनोपात्तदुरितनिबर्हणेन पुरुषसंस्कारेण न संयोगपृथक्त्वेन साक्षादङ्ग भावो युक्तः, कल्पनागौरवापत्तेः। तथाहि - ज्ञानोत्पत्तावङ्गभावोपपत्तौ नित्यकर्मानुष्ठानाद्धर्मोत्पादः, ततः पाप्मा निवर्त्तते, स ह्यनित्याशुचिदुःखरूपे संसारे नित्यशुचिसुखख्यातिलक्षणेन विपर्य्यासेन चित्तसत्त्वं मलिनयति, अतः पापनिवृत्तौ प्रत्यक्षोपपत्तिद्वारापावरणे सति प्रत्यक्षोपपत्तिभ्यां संसारस्यानित्याशुचिदुखरूपतामप्रत्यूहमवबुध्यते, ततोऽस्यास्मिन्ननभिरतिसंज्ञं वैराग्यमुपजायते, ततस्तज्जिहासोपावर्त्तते, ततो हानोपायं पर्य्येषते, पर्य्येषमाणश्चात्मतत्त्वज्ञानमस्योपाय इत्युपश्रुत्य तज्जिज्ञासते, ततः श्रवणादिक्रमेण तज्जानातीत्यारादुपकारकत्वं तत्त्वज्ञानोत्पादं प्रति चित्तसत्त्वशुद्धया कर्मणां युक्तम्। इममेवार्थमनुवदति भगवद्गीता –

"आरूरूक्षोर्मुनेर्योगं कर्म कारणमुच्यते। योगारूढस्य तस्यैव शमः कारणमुच्यते।'' एवं चाननुष्ठितकर्मापि प्राग्भवीयकर्मवशाद्यो विशुद्धसत्त्वः संसारासारतादर्शनेन निष्पन्नवैराग्यः कृतं तस्य कर्मानुष्ठानेन वैराग्योत्पादोपयोगिना, प्राग्भवीयकर्मानुष्ठानादेव तत्सिद्धेः। इममेव च पुरुषधौरेयभेदमधिकृत्य प्रववृत्ते श्रुतिः- ''यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेत्'' इति। तदिदमकतम कर्णात्रबोधात् प्रागप्यधीतवेदान्तस्य ब्रह्मजिज्ञासोपपत्तेः इति।

ज्ञानं न मनसीक्रिया भवति। ज्ञानं क्रियारहितं एव। न च विदिक्रियाकर्मत्वेन कार्यानुवेशो ब्रह्मणः, "अन्यदेव तद्विदितादथो अविदितादधि'' [7] इति विदिक्रियाकर्मत्वप्रतिषेधाद्, "यः सर्वजानाति तं केन विजानियात्'' [8] इति च।

तथोपास्तिक्रियाकर्मत्वप्रतिषेधोऽपि भवति - ''यद्वाचानभ्युदितं येन वागभ्युद्यते'' इत्यविषयत्वं ब्रह्मण उपन्यस्य, "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते'' [9] इति। अविषयत्वे ब्रह्मणः शास्त्रयोनित्वानुपपत्तिरिति चेत्, – न, अविद्याकल्पितभेदनिवृत्तिपरत्वाच्छास्त्रस्य। न हि शास्त्रमिदंतया विषयभूतं ब्रह्म प्रतिपिपादयिषति। किं तर्हि ? प्रत्यगात्मत्वेनाविषयतया प्रतिपादयदविद्याकल्पितं वेद्यवेदितृवेदनादिभेदमपनयति। तथा च शास्त्रम् - ''यस्याऽमतं तस्य मतं मतं यस्य न वेद सः। "अविज्ञातं विजानतां विज्ञातमविजानताम् [10] ''न दृष्टे द्रष्टारं पश्येः'', ''न विज्ञातोर्विज्ञातारं विजानीयाः'' इति चैवमादि। अतोऽविद्याकल्पितसंसारित्वनिवर्तनेन नित्यमुक्तात्मस्वरूप समर्पणान्न मोक्षस्यानित्यत्वदोषः। यस्य तूत्पाद्यौ मोक्षस्तस्य मानसं, वाचिकं कायिकं वा कार्यमपेक्षत इति युक्तम्। तथा विकार्यत्वे च; तयोः पक्षयोर्मोक्षस्य ध्रुवमनित्यत्वम्। न हि दध्यादि विकार्य उत्पाद्यं वा घटादि नित्यं दृष्टं लोके। न चाप्यत्वेनापि कार्यापेक्षा; स्वात्मस्वरूपत्वे सत्यनाप्यत्वात्। स्वरूपव्यतिरिक्तत्वेऽपि ब्रह्मणो नाप्यत्वं, सर्वगतत्वेन नित्याप्तस्वरूपत्वात्सर्वेण ब्रह्मणः, आकाशस्येव। नापि संस्कार्यो मोक्षः, येन व्यापारमपेक्षेत। संस्कारो हि नाम संस्कार्यस्य गुणाधानेन वा स्याद्दोषापनयनेन वा ? न तावद् गुणाधानेन संभवति; अनाधेयातिशय ब्रह्मस्वरूपत्वान्मोक्षस्य। नापि दोषापनयनेन; नित्य शुद्धब्रह्मस्वरूपत्वान्मोक्षस्य।

स्वात्मधर्म एव संस्तिरोभूतो मोक्षः क्रिययात्मनि संस्क्रियमाणेऽभिव्यज्यते, यथाऽऽदर्श निघर्षणक्रियया संस्क्रियमाणे भास्वरत्वं धर्म इति चेत् न, क्रियाश्रयत्वानुपपत्तेरात्मनः। यदाश्रया क्रिया तमविकुर्वतो नैवात्मानं लभते। यद्यात्मा क्रियया विक्रियेत, अनित्यत्वमात्मनः प्रसज्येत। ''अविकार्योऽयमुच्यते'' [11] इति चैवमदीनि वाक्यानि बाध्येरन्। तच्चनिष्टम्। तस्मान्न स्वाश्रया क्रियाऽऽत्मनः संभवति। अन्याश्रयायास्तु क्रियाया अविषयत्वान्न तयाऽऽत्मा संस्क्रियते। ननु देहाश्रयया स्नानाचमनयज्ञोपवीतादिकया क्रियया देही संस्क्रियमाणो दृष्टः, न ; देहादिसंहतस्यैवाविद्यागृहीतस्यात्मनः संस्क्रियमाणत्वात्। प्रत्यक्षं हि स्नानाचमनादेदेह- समबायित्वम्। तया देहाश्रयया तत्संहत एव कश्चिदविद्ययात्मत्वेन परिगृहीतः संस्क्रियत इति युक्तम्। यथा देहाश्रयचिकित्सानिमित्तेन धातुसाम्येन तत्संहतस्य तदभिमानिन आरोग्यफलम्, अहमरोग इति बुद्धिरुत्पद्यते। एव स्नानाचमनयज्ञोपवीतादिना अहं शुद्धः संस्कृत इति। यत्र बुद्धिरुत्पद्यते स संस्क्रियते। स च देहेन संहत एव। तेनैव ह्यहंकर्त्राऽहंप्रत्ययविषयेण प्रत्ययिना सर्वाः क्रिया निवर्त्यन्ते। तत्फलं च स एवाश्नाति ; ''तयोरन्य: पिप्पलं स्वाद्वत्यनश्नन्नयो अभिचाकशीति," इति मन्त्रवर्णात्। आत्मेन्द्रियमनोमुक्तं भोक्तेत्याहुर्मनीषिणः इति च। तथा च "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च' इति, ''स पर्यगाच्छुक्रमकायमब्रणमस्नाविर शुद्धमपापविद्धम्'' [12] इति चैतो मन्त्रावनाधेयातिशयतां नित्यशुद्धतां च ब्रह्मणो दर्शयतः। ब्रह्मभावश्च मोक्षः, तस्मान्न संस्कार्यौऽपि मोक्षः। अतोऽन्यन्मोक्षं प्रति क्रियानुप्रवेशद्वारं न शक्यं केनाचिद्दर्शयितुम्। तस्माज्ज्ञानमेकं मुक्त्वा क्रियाया गन्धमात्रस्याप्यनुप्रवेश इह नोपपद्यते।

ननु ज्ञानं नाम मानसी क्रिया न, वैलक्षण्यात्। क्रिया हि नाम सा, यत्र वस्तुस्वरूपनिरपेक्षैव चोद्यते, पुरुषचित्तव्यापाराधीना च। यथा- ''यस्यै देवतायै हविर्गृहीतं स्यात् तां मनसा ध्यायेद्वषट् करिष्यन्" इति, "संध्यां मनसा ध्यायेत्'' [13] इति चैवमादिषु। ध्यानं चिन्तनं यद्यपि मानसं, तथापि पुरुषेण कर्तृमकर्तृमन्यथा वा कर्तुं शक्यं, पुरुषतन्त्रत्वात्। ज्ञानं तु प्रमाणजन्यम्। प्रमाणं च यथाभूतवस्तुविषियम्, अतो ज्ञानं कर्तृमकर्तृमन्यथा वा कर्तुमशक्यम्, केवलं वस्तुतन्त्रमेव तत्। न चोदनातन्त्रम्। नापि पुरुषतन्त्रम्। तस्मान्मानसत्वेऽपि ज्ञानस्य महद्वैलक्षण्यम्। यथा च "पुरुषो वाव गौतमाग्नि:" ''योषा वाव गौतमाग्निः'' इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलचोदनाजन्यत्वात् क्रियैव सा पुरुषतन्त्रा च। या तु प्रसिद्धेऽग्ना वग्निबुद्धिः, न सा चोदनातन्त्रा, नापि पुरुषतन्त्रा। किं तर्हि ? प्रत्यक्षविषयवस्तुतन्त्रैवेति ज्ञानमेवैतन्न क्रिया। एवं सर्वप्रमाणविषयवस्तुषु वेदितव्यम्। तत्रैवं सति यथाभूतब्रह्मात्मविषयमपि ज्ञानं न चोदनातन्त्रम्। तद्विषये लिङ्गादयः श्रूयमाणा अप्यनियोज्यविषयत्वात्कुण्ठीभवन्ति, उपलादिषु प्रयुक्तक्षुरतैक्षण्यादिवद् ; अहेयानुपादेयवस्तुविषयत्वात्। किमर्थानि तर्हि ''आत्मा वा अरे द्रष्टव्यः श्रोतव्यः" इत्यादीनि विधिच्छायानि वचनानि ? स्वाभाविकप्रवृत्तिविषयविमुखी- करणार्थानीति ब्रूमः। यो हि बहिर्मुखः प्रवर्तते पुरुषः ''इष्टं मे भूयादनिष्टं मा भूद्'' इति न च तत्रात्यन्तिकं पुरुषार्थ लभते, तमात्यन्तिकपुरुषार्थवाञ्छिनं स्वाभाविककार्यकरणसंघात- प्रवृत्तिगोचराद्विमुखीकृत्य प्रत्यगात्मस्त्रोतस्तया प्रवर्तयन्ति ''आत्मा वा अरे द्रष्टव्यः'' इत्यादीनि। तस्यात्मान्वेषणाय प्रवृत्तस्याहेयमनुपादेयं चात्मतत्त्वमुपदिश्यते। "इदं सर्व यदयमात्मा" "यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येत् केन कं विजानीयात्'', ''विज्ञातारमरे केन विजानीयात्'' ''अयमात्मा ब्रह्म''' इत्यादिभिः। यदप्यकर्तव्यप्रधानमात्मज्ञानं हानायोपादानाय वा न भवतीति, तत्तथैवेत्यभ्युपगम्यते अलंकारो ह्ययमस्माकं यद् ब्रह्मात्मावगतौ सत्यां सर्वकर्तव्यताहानिः कृतकृत्यता चेति। तथा च श्रुतिः - "आत्मानं चेद्विजानीयादयमस्मीति पुरुषः। किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेत्" इति। "एतबुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत" इति स्मृतिः। तस्मान्न प्रतिपत्तिविधिविषयतया ब्रह्मण: समर्पणम्। अपि चाम्नायस्य क्रियार्थत्वादिति शास्त्रकृद्वचनं तत्रार्थग्रहणं यद्यभिधेयवाचि ततो भूतार्थानां द्रव्यगुणकर्मणामानर्थक्यमनमिधेयत्वं प्रसज्येत, न हि ते क्रियार्था इत्यत आह। अपि चाम्नायस्य इति। यद्युच्येत न हि क्रियार्थत्वं क्रियाभिधेयत्वयपि तु क्रियाप्रयोजनत्वं द्रव्यगुणशब्दानां च क्रियार्थत्वेनैव भूतद्रव्यगुणाभिधानं न स्वनिष्ठतया। यथाहुः शास्त्रविदः "चोदना हि भूतं भवन्तम्'' इत्यादि। एतदुक्तं भवति कार्य्यमर्थमवगमयन्तो चोदना तदर्थं भूतादिकमप्यर्थं गमयतीति, तत्राह प्रधृत्तिनिवृत्तिव्यतिरेकेण भूतं चेद् इति। अयमभिसन्धिः - न तावत् कार्य्यार्थ एव स्वार्थे पदानां सङ्गतिग्रहो नान्यार्थ इत्युपपादितं भूतेऽप्यर्थे थ्युत्पत्तिं दर्शयद्भिः। नापि स्वार्थमात्रपरतैव पदानां तथा सति न वाक्यार्थप्रत्ययः स्यात्। न हि प्रत्येकं स्वप्रधानतया गुणप्रधानभावरहितानामेकवाक्यता दृष्टा। तस्मात् पदानां स्वार्थमभिदधतामेकप्रयोजनवत् पदार्थ परतयैकवाक्यता। तथा च तत्तदर्थान्तरविशिष्टैकवाक्यार्थप्रत्यय उपपन्नो भवति।

तथा चार्थान्तरसंसर्गपरतामात्रेण वाक्यार्थप्रत्ययोपपत्तौ न कार्य्यसंसर्गपरत्वनियमः पदानाम्। एवं च सति कूटस्थनित्यब्रह्मरूपपरत्वेऽप्यदोष इति। भव्यं कार्य्यम्। ननु यद्धव्यार्थं भूतमुपदिश्यते न तद् भूतं भव्यसंसर्गिणा रूपेण तस्यापि भव्यत्वादित्यत आह, न हि भूतमुपदिश्यमानम् इति। न तादात्म्यलक्षणः संसर्गः, किन्तु कार्येण सह प्रयोजनप्रयोजनिलक्षणोऽन्वयः। तद्विषयेण तु भावार्थेन भूतार्थानां क्रियाकारकलक्षण

इति न भूतार्थानां क्रियार्थत्वमित्यर्थ। शङ्कते - अक्रियात्वेऽपि इति। एवं चाक्रियार्थकूटस्थनित्यब्रह्मोपदेशानुपपत्तिरिति भावः। नैष दोषः, क्रियार्थत्वेऽपि इति। न हि क्रियार्थ भूतमुपदिश्यमानमभूतं भवति। अपि तु क्रियानिर्वर्त्तनयोग्यं भूतमेव तत्। तथा च भूतेऽर्थेऽवधृतशक्तयः शब्दाः क्वचित् स्वनिष्ठभूतविषया दृश्यमाना मृत्वा शीर्त्वा वा न कथञ्चित् क्रियानिष्ठतां गमयितुमुचिताः। तद्रुपहितं शतशो दृष्टमप्यनुपहितं क्वचिद् दृष्टमदृष्टं भवति। तथा च वर्तमानापदेशा अस्तिक्रियोपहिता अकार्य्यार्था अप्यटवीवर्णकादयो लोके वहुलमुपलभ्यन्ते, एवं क्रियाऽनिष्ठा अपि सम्बन्धमात्रपर्यवसायिनः, यथा कस्यैष पुरुष इति प्रश्नोत्तरं राज्ञ इति, तथा प्रतिपादिकार्थमात्रनिष्ठा, यथा कीदृशास्तरव इति प्रश्नोत्तरं फलिन इति, न हि पृच्छता पुरुषस्य वा तरूणां वाऽस्तित्वनास्तित्वे प्रतिपित्सिते, किन्तु पुरुषस्य स्वामिभेदस्तरूणां च प्रकारभेदः। प्रष्टुरपेक्षितं चाचक्षाणः स्वामिभेदमेव च प्रकारभेदरूपमेव च प्रतिवक्ति, न पुनरस्तित्वं, तस्य तेनाप्रतिपित्सितत्वात्। उपपादिता च भूतेऽप्यर्थे व्युत्पत्तिः प्रयोजनवति पदानाम्।

अग्निहोत्राधिकरणेऽपि ज्ञानात् कर्मणोऽवैलक्षण्यं प्रतिपादितम्। पुण्यस्याप्यश्लेष-विनाशयोरधन्यायोऽनिर्दिष्टः, सोऽतिदेशः सर्वपुण्यविषयः इत्याशंक्य प्रतिवादि अग्निहोत्रादिदित्विति, ''तु'' शब्द आशंकामानुदति, यन्नित्यं कर्म वैदिकमग्निहोत्रादि, तत् कार्ययैव भवति, ज्ञानस्य यत् कार्यं तदेवास्यापि कार्यमित्यर्थः। कुतः ''तमेतं वेदानुवचनेन ब्रह्मणा विविदिषन्ति यज्ञेन दानेन'' [14] इत्यादि दर्शनात्। न केवलमत्र विद्यासंयुक्तं केवलं चाविशेषेणेति। कुतः संशयः। "तमेतमात्मनं यज्ञेन विविदिषन्ति'' [15] इति यज्ञादीनामविशेषेणात्मवेदमांगवत्वेन श्रवणात्।

विद्यया संयुक्तस्य चाग्निहोत्रादेर्विशिष्टत्वावगमात्। किं तावत् प्राप्तम्। विद्यासंयुक्तमेव कर्माग्निहोत्राद्यात्मविद्याशेषत्वं प्रतिपद्यते। न विद्याञ्चीनम्। विद्योपेतस्य विशिष्टत्वावगमादविद्याविहीनात्। ''यदहरेव जुह्वति तदहः पुनर्भूत्युपापजयत्वेवं चिद्धान्'' इत्यादि श्रुतिभ्यः। ''बुद्धयायुक्तो यया पार्थ कर्मबन्धं प्रहास्यसि'' [16] ''दूरेण हयवरं कर्म बुद्धियोगाद् धर्म जय'' [17] इत्यादि स्मृतिभ्यश्चेति। अग्निहोत्रादिकं यत् यत् कर्म क्रियते तदेव सर्व विद्यासंयुक्तं भवति। विद्यां विना तत्कर्म आशोभनं स्यात्। तदुक्तं नीतिशास्त्रे- ''विद्याधर्मं सर्वधनं प्रधानम्''।

विद्शब्दः ज्ञानार्थकत्वात् यः कोऽपि मानवः ज्ञानहीनः सन् यत् कर्म करोति तत् कर्म लोकेषु अनादृतं भवति। सर्वे वदन्ति अरे कथं भवान् वा वदूकः यतो हि कर्मणः यथार्थ्यमज्ञात्वा कस्मिन् कर्मणि प्रवृत्तः भवसि त्वं। अत्र एवं उच्यते - यद्यपि ज्ञानकर्मसमुच्चयवादः न स्वीकृत: वेदान्तवादिना, परन्तु ज्ञानयुक्तं कर्म करणीयम्। अत्र उदाहरणं दीयते यत् "घटज्ञानवान् अस्मि अहम्'' इति अनुव्यवसायबुद्ध्या घट मम ज्ञानं न नस्यति। अत्र कर्मणः विनाशः जायते, न ज्ञानस्य। कथं तर्हि ज्ञानकर्मणोः समुच्चयः। यथा मानवे मृते प्राप्ते मनुष्यत्वं जाति, न मृततां भजते। ननु ज्ञानकर्मणो विलक्षणत्वे सति तत्रैकार्यैकावत्वोपपत्तिर्न भवति। अत्र नास्ति काऽपि दोषः। यथा ज्वर तथा मृत्योः कारणं भवति पदार्थद्वयमदधिविषय च। तत्र गुड तथा मन्त्रसंयोगात् तृप्ति एवं पुष्टिरूपं कार्यद्वयं दृश्यते तद्वत् ज्ञानसंयुक्तस्य कर्मणोऽपि मोक्षकार्य संभवति। तत्र अपि उच्यते अनारम्भः भवति। तस्य कार्यत्वं कथं संगच्छते। नास्त्यत्र दोषः आरादुपकारकत्वात् कर्मणः ज्ञानस्यैव हि प्रापकं सत्कर्मप्राणा इयं मोक्षकारणपित्वुपचर्यते, ज्ञानस्य प्रापकं यदि कर्म भवति तदेव परम्परासंबन्धेन अन्तःकरणशुद्धिमाध्यमेन मोक्षस्य कारणं भवति। उपचारेण इत्थं स्वीकृतम्। अतएव इदमेव कार्येकत्वस्य अभिधानमतिक्रान्तकर्मविषयकं भवति। कारणं यत् नहि ब्रह्मविद आगमाग्निहोत्रादि संभवति। अनियोज्यब्रह्मत्वप्रतिपत्तेः शास्त्रस्य विषयत्वात्। ''स एतत् सर्वं जानाति।'' अत्र जानाति इति ज्ञानवाचकः शब्दः भवति। एतदर्थ विद्या ज्ञानसाधनाधिकरणस्य श्रुतिवाक्यं तथा स्मृतिवाक्यं च दीयते। तद्यथा –

"समाधिगतमेतदनन्तरमधिकरणे नित्यमग्निहोत्रादिकं कर्म मुमुक्षूणां मोक्षप्रयोजनोद्देश्येन कृतं प्राप्तदुरितक्षयहेतुत्वाद्वारेण सत्वशुद्धिकारणतां प्रतिपद्यमानं मोक्षप्रयोजनब्रह्माधिगमनिमित्तत्वेन ब्रह्मविद्यया सहैककार्यं भवतीति। तत्राग्निहोत्रादि कर्मागव्यपाश्रयविद्यासंयुक्तं केवलं चास्ति। "य एवं विद्वान् यजति य एवं विद्वान् जुहोति'', ''य एवं विद्वांद्वंशति, य एवं विद्वान गायति, तस्मादेवं विद्यमेव ब्रह्मणं कुर्वति नानेविधम्,'' तेनेभौ कुरुतो यश्चैतदेवं वेद यस्य न वेद'' इत्यादि वचनेभ्यो विद्यासंयुक्तमेवाग्निहोत्रादिकं कर्म मुमुक्षोर्विद्याहेतुत्वेन तया सहैकाकार्यत्वं प्रतिपाद्यते, तद्वत् ज्ञानं चान्यत्कर्म चान्यत्। यानि यानि शास्त्राणि नाटकानि उपदेशवचनानि शास्त्रकारैः काव्यकारै वा कृतानि तानि तानि सर्वाणि ज्ञानरहितानि भवन्ति। अन्यस्य रन्धनं वा तत् ज्ञानं च पृथक्रूपेण स्वीकृतम्। यदेव विद्ययेति हि सत्यमेतत् विद्यासंयुक्तं अग्निहोत्रादिकं विद्याविहीनात् कर्मणो अग्निहोत्राद् विशिष्टम्, विद्वान इव ब्रह्मणो विद्याविहीनाद् ब्रह्मणः। तथ नात्यन्तमनपेक्षं विद्याविहीनं कर्माग्निहोत्रादिकम्। कस्मात्, ''तमेतमात्मानं यज्ञेन विविदिषन्ति'' इति विशेषेण अग्निहोत्रादेः विद्याहेतुत्वेन श्रुतत्वात्।

वेदान्तशास्त्रे प्रतिपादितं यज्ज्ञानं यत् कर्म च तद्वक्तुं न शक्यते, कोऽपि अनिर्वचनीयत्वात्। अनिर्वचनीयं नाम सत्वेन वक्तुं नैव शक्यते। असत्त्वेन वक्तुं नैव शक्यते सद्सद्भ्यामपि वक्तुं नैव शक्यते।

### सन्दर्भ सूची


1. ब्र.सू. - २/३/१२/१८
2. बृ.उ. - ४/३/६
3. बृ.उ. - १/४/७
4. बृ. उ. - ३/९/२८
5. तै. उ २/११
6. छा. ८/३/२
7. विदितात् अन्यत् अविवितात् (केन- १/३)
8. यः सर्वजानाति.............(बृ.उ. २/४/१३)
9. यस्य उपासनाक्रियते भवता सः न ब्रह्म पदवाच्य भवति (केन. १/४) १०)
10. यः वदति अहं न जाने ब्रह्मतत्वं स एव यथार्थता जानाति (केन. २/३)
11. श्री.भ.गी. २ / २५
12. दृशा ८
13. ऐ.ब्रा. (३/८/१)
14. बृ. उ. - ४/४/२२
15. छ.उ. १/१/१०
16. श्री.भ.गी. २/३१
17. श्रीभ.गी. २/४९